# Sankhyayogaghatalakshmivratam

# સાઙ્ખ્યયોગઘટલક્ષ્મીવ્રતમ્

## Document Information

Text title : Sankhyayogaghatalakshmivratam

File name : sAnkhyayogaghaTalakShmIvratam.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, lakShmI

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 137/87-99||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# સાઙ્ખ્યયોગઘટલક્ષ્મીવ્રતમ્

અથાઽપ્યન્યદ્વ્રતં લક્ષ્મિ વદામિ સાઙ્ખ્યયૌગિકમ્ ।
સાઙ્ખ્યયોગકૃતદીક્ષાયુતાં ત્વાં તત્ર પૂજયેત્ ॥ ૮૭॥

પૂર્ણિમાયાં તથા ચૈકાદશ્યાં શુક્લે તુ પક્ષકે ।
સર્વમાસેષુ સૌવર્ણાં કૃત્વા લક્ષ્મીં શુભાનનામ્ ॥ ૮૮॥

રક્તામ્બરાં રક્તલેપાં રક્તચન્દનચર્ચિતામ્ ।
પાટલાં ત્વાં રત્તવર્ણાસને સમ્યક્ પ્રપૂજયેત્ ॥ ૮૯॥

રક્તકુઙ્કુમસલિલૈઃ સ્નાપયેત્ત્વાં વિભૂષયેત્ ।
રક્તપુષ્પામ્બરૈ રક્તહારૈ રક્તફલાદિભિઃ ॥ ૯૦॥

રક્તપુષ્પૈઃ પૂજયેચ્ચ રક્તાં નારાયણે મયિ ।
ભોજયેત્પૂજયેચ્ચાપિ નીરાજયેન્નમેત્તથા ॥ ૯૧॥

પ્રાર્થયેત્પૂજિકાં ત્વાં ચ સાઙ્ખ્યયોગવ્રતસ્થિતા ।
રક્તવસ્ત્રે મહાલક્ષ્મિ રક્તે નારાયણે સ્થિતે ॥ ૯૨॥

સ્વાસ્થ્યં ત્યાગં મહાશાન્તિં હરેર્યોગં પ્રદેહિ મે ।
અન્યેભ્યશ્ચ વિરક્તાઽહં રક્તાઽહં શ્રીપતૌ પ્રભૌ ॥ ૯૩॥

સાઙ્ખ્યયોગમહાલક્ષ્મીવ્રતં તેઽત્ર કરોમ્યહમ્ ।
અનેન મમ સૌભાગ્યં તવૈવ ભવતાદ્ધરૌ ॥ ૯૪॥

સર્વવિઘ્નવિનાશોઽસ્તુ સર્વાનન્દા ભવન્તુ મે ।
સર્વે રસાઃ સર્વશ્રેયઃકલ્યાણાનિ ભવન્તુ મે ॥ ૯૫॥

ઇત્યભ્યર્થ્ય દિશેલ્લક્ષ્મીં ગુરવે કાનકીં તથા ।
રત્નભૂષામ્બરધાન્યપાત્રાદીનિ સમર્પયેત્ ॥ ૯૬॥

એવં વ્રતં પ્રકર્ત્ર્યાસ્તુ હરેર્દાસ્યં પ્રપદ્યતે ।
ભુક્તિર્મુક્તિર્ભવેદ્ધસ્તગતા નારાયણાશ્રયાત્ ॥ ૯૭॥

સોપવાસં પ્રકર્તવ્યં સાઙ્ખ્યયૌગવ્રતં ત્વિદમ્ ।
સર્વપાપહરં દિવ્યદેહપ્રદં હરિપ્રિયમ્ ॥ ૯૮॥

હરિપ્રિયા ભવેત્સાધ્વી વ્રતકર્ત્રી વિદેહિની ।
ચમત્કારમયી દિવ્યાઽક્ષરધામગતા ભવેત્ ॥ ૯૯॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૩૭-અધ્યાયાન્તર્ગતં સાઙ્ખ્યયોગઘટલક્ષ્મીવ્રતં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૩૭/૮૭-૯૯॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 137/87-99..

This stotra is meant for women.

Proofread by PSA Easwaran

---

*Sankhyayogaghatalakshmivratam*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*